संस्कृत वार्ता:

दिनाङ्क : 26/03/2026      सायम् - 06:20

## आदौ मुख्यवार्ता:

- सर्वकारेण उक्तं यत् देशस्य सर्वाणि तैलशोधागाराणि उच्चक्षमतया कार्यं कुर्वन्ति, यत्र पर्याप्तानि अशोधितानि तैलानि सन्ति। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयः अवदत् यत् पेट्रोल्-डीज़ल् इत्येतयोः पर्याप्तानि भण्डाराणि अपि रक्षितानि सन्ति।
- विश्वस्य सर्वाधिक-लोकप्रियः नेता प्रधानमन्त्री नरेन्द्रमोदी एकस्मिन् नूतने वैश्विक-सर्वेक्षणे पुनः एकवारं विश्वस्य सर्वाधिक-लोकप्रिय-नेतृत्वेन निर्वाचितः।
- विदेश-मन्त्री डा. एस्. जयशङ्करः अद्य फ्रान्स्-देशस्य स्वस्य समकक्षीयेन जीन्-नोएल बैरोट् इत्यनेन सह द्वैपाक्षिकं वार्तालापम् अकरोत्।
- अद्य अशेषे हि देशे सहर्षं सश्रद्धं च रामनवमी समाचर्यमाणास्ति।

----------

## अन्तामंत्रालयीय – वक्तव्यं

सर्वकारेण उक्तं यत् देशस्य सर्वाणि तैलशोधागाराणि उच्चक्षमतया कार्यं कुर्वन्ति, यत्र पर्याप्तानि अशोधितानि तैलानि सन्ति। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयः अवदत् यत् पेट्रोल्-डीज़ल् इत्येतयोः पर्याप्तानि भण्डाराणि अपि रक्षितानि सन्ति, यत्र सर्वाणि विक्रयणस्थानानि सम्पूर्णे देशे सामान्यरूपेण प्रवर्तन्ते, सर्वेषु पेट्रोल्-पम्प्स् इत्यत्र च पर्याप्तानि भण्डाराणि उपलभ्यन्ते। होर्मुज़्-जलसंधेः पिधाने मन्त्रालयः अवदत् यत्, सम्पूर्णे देशे पेट्रोलियम-उत्पादानां, एल्. पी. जी. इत्यस्य च अविरामपूर्तिं निर्वोढुं सर्वकारः अनेकान् उपायान् अकरोत्। अग्रे उक्तम् यत्, सम्पूर्णे देशे आन्तरिक-एल्. पी. जी. सिलिण्डर इत्यस्य वितरणम् सामान्यम् एव अस्ति, एल्. पी. जी. वितरणक्षेत्रेषु शुष्कता न दृश्यते।

## विश्वस्य सर्वाधिक-लोकप्रियः नेता प्रधानमन्त्री नरेन्द्रमोदी

विश्वस्य सर्वाधिक-लोकप्रियः नेता प्रधानमन्त्री नरेन्द्रमोदी अमरीका-देशस्य दत्तांश-विश्लेषण-संस्थया 'मॉर्निङ्ग कन्सल्ट' इत्यनया नूतने वैश्विक-सर्वेक्षणे पुनः एकवारं विश्वस्य सर्वाधिक-लोकप्रिय-नेतृत्वेन निर्वाचितः। मार्च-मासस्य द्वि दिनाङ्कतः अष्ट दिनाङ्क-पर्यन्तं संचालिते अस्मिन् सर्वेक्षणे, श्री मोदी अष्टषष्टिः प्रतिशतं अनुमोदन-मानाङ्कं प्राप्तवान् । स्विट्जरलैण्ड-देशस्य राष्ट्रपतिः गाय पार्मेलिन तथा दक्षिण-कोरिया-देशस्य राष्ट्रपतिः ली जे-म्युङ् च द्विषष्टिः प्रतिशतं अङ्कैः सह द्वितीयस्थाने स्तः। चेक-गणराज्यस्य अर्जेण्टीना-देशस्य च नेतारौ क्रमशः सप्तपंचाशत् अथ पंचषष्टिः प्रतिशतं अङ्कान् प्राप्तवन्तौ। अस्यां सूच्यां अमरीका-राष्ट्रपतिः डॉनल्ड ट्रम्पः केवलम् एकत्रिंशत् प्रतिशतं अङ्कान् लब्ध्वा प्रथम-दश-शीर्ष-स्थानेषु स्थानं न अवाप्तवान्।

## विदेश-मन्त्री डा. एस्. जयशङ्करः

विदेश-मन्त्री डा. एस्. जयशङ्करः अद्य फ्रान्स्-देशस्य अब्बे डेस्-वोक्स्-डी-सेर्नें इत्यत्र स्वस्य फ़्रान्स्-देशस्य समकक्षीयेन जीन्-नोएल बैरोट् इत्यनेन सह द्वैपाक्षिकं वार्तालापम् अकरोत्। डा. जयशङ्करः जी-7 विदेशमन्त्रिमण्डलस्य सदस्यदेशैः सह उपवेशने भागग्रहणाय द्वि दिवसीय यात्रायाम् फ्रान्स्-देशे अस्ति।

## रेलवे संरचना

भारतीय-रेलमार्गेण स्वस्य सञ्चार-आधारभूत-संरचनायाः उन्नयनार्थं तथा 'कवच' इति स्वदेशी-स्वचालित-सुरक्षा-तन्त्रस्य विस्ताराय द्विशतोत्तरैकसहस्र कोटि-रूप्यतोप्यधिकमूल्यस्य परियोजना स्वीकृता। रेल-मन्त्रालयानुसारं एतासां योजनानां मुख्यं लक्ष्यं तावत् उन्नत-फाइबर-सञ्चार-प्रणाल्याः माध्यमेन रेल-जालस्य सञ्चालन-क्षमतायाः सुरक्षायाः च वर्धनमस्ति । मन्त्रालयेन मध्य-रेलवे इत्यस्य पञ्चसु अपि मण्डलेषु सुदृढं **ड्यूल-फाइबर-सञ्चार-जालं** स्थापयितुं षड्शत् कोटि-रूप्यतोप्यधिक व्ययेन परियोजना अनुमोदिता। सुरक्षा-उपायेषु कवच चतुः दशांश शून्यं' इति उन्नत-तन्त्रं तमिळनाडु-केरळ-कर्णाटक-राज्येषु अष्टचत्वारिंशदुत्तरपंचशत् किलोमीटर् परिमितेषु अति-व्यस्त-मार्गेषु त्रिशत् कोटि-रूप्यकाणां व्ययेन स्थापयिष्यते। तन्त्रमिदं सङ्कटकाले स्वयमेव **ब्रेक इति अवरोधं** प्रयुज्य रेलयानानां परस्परं संघट्टं रोद्धुं निर्मितमस्ति, येन व्यस्त-मार्गेषु यात्रा अधिका सुरक्षिता भविष्यति।

## गडकरी सड़क सुरक्षा अभियान

केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्री नितिन-गड्करी-वर्यः अद्य अवदत् यत्, सर्वकारेण सम्पूर्णे देशे दुर्घटनाप्रवण-ब्लैक्-स्पाट्-इत्येतेषां अभिज्ञानम्, संशोधनम् च कृत्वा मार्ग-सुरक्षां वर्धयितुं विस्तृतानि उपायानि प्रारब्धानि सन्ति इति।

नवदिल्ल्यां षड्विंशत्यधिक द्विसहस्रतम वर्षस्य सडक-सुरक्षा-अभियाने अभिनेत्रा आमिर खानेन सह वार्तालापं कुर्वन, मन्त्री अवदत् यत् उन्नतेः मार्गविन्यासस्य सुरक्षायाः च कृते चत्वारिंशत् सहस्रकोटिरूप्यकाणि व्ययः कृतः अस्ति, अपि च प्रायः अभिधीयमानेषु सार्द्ध-त्रिशत-कृष्ण-स्थानेषु प्रायः अशित्यधिक द्विशत-स्थानानां पूर्वमेव संशोधनम् अभवत्। श्री गड्करी वर्यः अवदत् यत् देशस्य वाहन-उद्योगः सद्यः एव वर्षेषु महती वृद्धिम् अवाप्नोत् तथा च तृतीयः बृहत्तमः वैश्विकरूपेण उद्भूतः अस्ति। सः अवदत् यत्, नीति-परिष्कारैः, मूलसौकर्याभिवृद्ध्या च समर्थितं, अग्रिमेषु पञ्चवर्षेषु भारतं अस्मिन् क्षेत्रे शीर्षस्थाने नयितुं दूरदृष्ट्या सह प्रशासनं कार्यं कुर्वन् अस्ति।

## <u>नेपाल-जेन जी आन्दोलन</u>

सितम्बर-मासे सञ्जातस्य **जेन-ज़ी** आन्दोलनस्य कारणानि अन्वेष्टुं गठितस्य कार्की-अन्वेशनायोगस्य प्रतिवेदनेन स्पष्टं जातं यत् देशस्य मुख्या गुप्तचर-संस्था **राष्ट्रियान्वेषणविभागः** आन्दोलनकाले पूर्णतया विफलः अभवत्। सितम्बरमासस्य अष्ट दिनाङ्के काठमाण्डू-नगरे विभागस्य त्रुटिपूर्णानुमानेन केवलं त्रिसहस्रतः चतुः सहस्र पर्यन्तं प्रदर्शकाः एकत्रिताः भविष्यन्ति, अन्याः सुरक्षा-संस्थाः स्वकीयाः योजनाः निर्मितवत्यः। काठमाण्डू-नगरस्य मुख्य-जनपद-अधिकारिणा आरक्षक-अधिकारिभिः च आयोगस्य समक्षं दत्तैः वक्तव्यैः ज्ञायते यत् विभागस्य असत्य-सूचनायाः कारणेनैव सुरक्षा-सज्जासु शिथिलता अभवत्। प्रतिवेदने निष्कर्षः दत्तः यत् वास्तविक-संख्यायाः विभागस्य अनुमानस्य च मध्ये एतावान् महान् भेदः विभागस्य प्रमुखस्य हुतराज थापा इत्यस्य व्यावसायिक-दुर्बलतां प्रकटयति। यद्यपि थापा-महोदयः सूचना-सङ्ग्रहस्य आन्तरिक-तन्त्रस्य सीमां तथा च **साइबर-तन्त्रस्य** अभावं दोषं मत्वा स्वकीयं उत्तरदायित्वं निवारयितुं प्रयत्नं कृतवान्।

## <u>पुदुचेरी-मुख्यनिर्वाचनाधिकारी</u>

पुदुचेरी-केन्द्रशासितप्रदेशस्य मुख्यनिर्वाचनाधिकारी पी.एस. जवाहरः अवदत् यत् मतदादातृणां कृते धनस्य निःशुल्कदानस्य च वितरणं निवारयितुं केन्द्रशासितप्रदेशस्य सर्वेषु निर्वाचनक्षेत्रेषु ड्रोनयन्त्रेण-निरीक्षणं नियोजयिष्यते। सः अवदत् यत् देशे एतत् प्रथमं अवसरम् अस्ति यत् राज्यस्य अथवा केन्द्रशासितप्रदेशस्य सर्वेषु निर्वाचनक्षेत्रेषु एतादृशं ड्रोन-निरीक्षणं कार्यान्वितम् अस्ति। पञ्चदश देशानाम् निर्वाचनप्रबन्धनसंस्थानां प्रतिनिधयः निर्वाचनप्रक्रियां निरीक्षणार्थं पुदुचेरी-नगरम् आगमिष्यन्ति इत्यपि सः सूचितवान्। सः अवदत् यत् उड्डयन-दलानां सङ्ख्या वर्धिता भविष्यति।

## बलोच-मानवाधिकार

जिनेवायां संयुक्तराष्ट्रसङ्घस्य मानव-अधिकार-परिषदः एकषष्ठीतमे सत्रे, सत्रं सम्बोधयन्, बी. एन्. एम्. अध्यक्षेण नसीम बलोचः इत्यनेन पाकिस्तानस्य अधिकारिणां उपरि, सम्पूर्णे बलूचिस्ताने, न्यायेतर-हत्याः, बलात् अन्तर्धानम्, यातना इत्यादीनां गम्भीर-मानव-अधिकार-उल्लङ्घनानां आरोपः आरोपितम्।

## रामनवमी

अद्य अशेषे हि देशे सहर्षं सश्रद्धं च रामनवमी समाचर्यमाणास्ति। अयं उत्सवः भगवत: विष्णोः सप्तमावतारस्य रामस्यावतरणस्य प्रतीकमस्ति। रामनवमी चैत्रमासस्य नवमे दिने आचर्यते। सर्वत्रैव तावत् श्रद्धातिरेक: अनुभूयमान:। अवसरेऽस्मिन् राष्ट्रपति: पदासीना द्रौपदी मुर्मु: उपराष्ट्रपति: सी.पी. राधाकृष्णन् वर्य: च सर्वेभ्य: देशवासिभ्य: शुभकामना: ख्यापितवन्तौ। प्रधानमन्त्रिणा नरेन्द्रमोदिना रामनवमीपर्वणावसरे प्रजाभ्य: शुभकामना: प्रकटिता:।

।। इति वार्ता: ।।